# Aditikritam Surya Stotram 19

# अदितिकृतं सूर्यस्तोत्रम् १९

## Document Information

Text title : Aditikritam Surya Stotram 19

File name : aditikRRitaMsUryastotram19.itx

Category : navagraha, mArkaNDeyapurANa, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : mArkaNDeyapurANa | adhyAya 101/18-29||

Latest update : October 12, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 12, 2024

*sanskritdocuments.org*

# अदितिकृतं सूर्यस्तोत्रम् १९

अदितिरुवाच ।
नमस्तुभ्यं परां सूक्ष्मां सौवर्णीं बिभ्रते तनुम् ।
धाम धामवतामीश धाम्नामाधार शाश्वत ॥ १८॥

जगतामुपकाराय तथापस्तव गोपते ।
आददानस्य यद्रूपं तीव्रं तस्मै नमाम्यहम् ॥ १९॥

ग्रहीतुमष्टमासेन कालेनेन्दुमयं रसम् ।
बिभ्रतस्तव यद्रूपमतितीव्रं नतास्मि तत् ॥ २०॥

तमेव मुञ्चतः सर्वं रसं वै वर्षणाय यत् ।
रूपमाप्यायकं भास्वंस्तस्मै मेधाय ते नमः ॥ २१॥

वार्युत्सर्गविनिष्पन्नमशेषं चौषधीगणम् ।
पाकाय तव यद्रूपं भास्करं तं नमाम्यहम् ॥ २२॥

यच्च रूपं तवातीतं हिमोत्सर्गादिशीतलम् ।
तत्कालसस्यपोषाय तरणे तस्य ते नमः ॥ २३॥

नातितीव्रं च यद्रूपं नातिशीतं च यत्तव ।
वसन्तर्त्तौ रवे सौम्यं तस्मै देव नमो नमः ॥ २४॥

आप्यायनमशेषाणां देवानां च तथापरम् ।
पितॄणां च नमस्तस्मै सस्यानां पाकहेतवे ॥ २५॥

यद्रूपं जीवनायैकं वीरुधाममृतात्मकम् ।
पीयते देवपितृभिस्तस्मै सोमात्मने नमः ॥ २६॥

आप्यायदाहरूपाभ्यां रूपं विश्वमयं तव ।
समेतमग्नीषोमाभ्यां नमस्तस्मै गुणात्मने ॥ २७॥

यद्रूपमृग्यजुःसाम्नामैक्येन तपते तव ।

विश्वमेतत्त्रयीसंज्ञं नमस्तस्मै विभावसो ॥ २८॥

मार्कण्डेय उवाच ।
यत्तु तस्मात्परं रूपमोमित्युक्त्वाभिशब्दितम् ।
अस्थूलानन्तममलं नमस्तस्मै सदात्मने ॥ २९॥

इति मार्कण्डयपुराणे एकाधिकशततमाध्यायान्तर्गतं
अदितिकृतं सूर्यस्तोत्रं समाप्तम् ।

मार्कण्डेयपुराण । अध्याय १०१/१८-२९॥

mArkaNDeyapurANa . adhyAya 101/18-29..

Proofread by PSA Easwaran

*Aditikritam Surya Stotram 19*

pdf was typeset on October 12, 2024

Please send corrections to *sanskrit@cheerful.com*